श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये चतुःपञ्चाशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये चतुःपञ्चाशं दशकम् ॥

## कालियमर्दने गोगोपानामुज्जीवनवर्णनम्

त्वत्सेवोत्कस्सौभरिर्नाम पूर्वं
कालिन्द्यन्तर्द्वादशाब्दं तपस्यन्।
मीनव्राते स्नेहवान् भोगलोले
तार्क्ष्यं साक्षादैक्षताग्रे कदाचित् ॥ 54.1 ॥

त्वद्वाहं तं सक्षुधं तृक्षसूनुं
मीनं कञ्चिज्जक्षतं लक्षयन् सः।
तप्तश्चित्ते शप्तवानत्र चेत् त्वं
जन्तून् भोक्ता जीवितं चापि मोक्ता ॥ 54.2 ॥

तस्मिन् काले कालियः क्ष्वेलदर्पात्
सर्पारातेः कल्पितं भागमश्नन्।
तेन क्रोधात् त्वत्पदाम्भोजभाजा
पक्षक्षिप्तस्तद्दुरापं पयोऽगात् ॥ 54.3 ॥

घोरे तस्मिन् सूरजानीरवासे
तीरे वृक्षा विक्षताः क्ष्वेलवेगात्।
पक्षिव्राताः पेतुरभ्रे पतन्तः
कारुण्यार्द्रं त्वन्मनस्तेन जातम् ॥ 54.4 ॥

काले तस्मिन्नेकदा सीरपाणिं
मुक्त्वा याते यामुनं काननान्तम्।

त्वय्युद्दामग्रीष्मभीष्मोष्मतप्ता
    गोगोपाला व्यापिबन् क्ष्वेलतोयम् ॥ **54.5** ॥

नश्यज्जीवान् विच्युतान् क्ष्मातले तान्
    विश्वान् पश्यन्नच्युत त्वं दयार्द्रः।
प्राप्योपान्तं जीवयामासिथ द्राक्
    पीयूषाम्भोवर्षिभिः श्रीकटाक्षैः ॥ **54.6** ॥

किं किं जातो हर्षवर्षातिरेकः
    सर्वाङ्गेष्वित्युत्थिता गोपसङ्घाः।
दृष्ट्वाऽग्रे त्वां त्वत्कृतं तद्विदन्त -
    स्त्वामालिङ्गन् दृष्टनानाप्रभावाः ॥ **54.7** ॥

गावश्चैवं लब्धजीवाः क्षणेन
    स्फीतानन्दास्त्वां च दृष्ट्वा पुरस्तात्।
द्रागावव्रुः सर्वतो हर्षबाष्पं
    व्यामुञ्चन्त्यो मन्दमुद्यन्निनादाः ॥ **54.8** ॥

रोमाञ्चोऽयं सर्वतो नः शरीरे
    भूयस्यन्तः काचिदानन्दमूर्छा।
आश्चर्योऽयं क्ष्वेलवेगो मुकुन्दे -
    त्युक्तो गोपैर्नन्दितो वन्दितोऽभूः ॥ **54.9** ॥

एवं भक्तान् मुक्तजीवानपि त्वं
    मुग्धापाङ्गैरस्तरोगांस्तनोषि।
तादृग्भूतस्फीतकारुण्यभूमा
    रोगात् पाया वायुगेहाधिवास ॥ **54.10** ॥

॥ इति श्रीमन्नारायणीये चतुःपञ्चाशं दशकं समाप्तम् ॥